# अष्टरागमालिका ताळम्: रूपकम्

## श्री मुत्तुस्वामि दीक्षित विरचिता

## पूर्णचन्द्रिका रागः

पूर्णचन्द्रबिम्बविजयवदने कमलाम्बिके
पाहि मां वरदे गुरुगुहजननि श्री

## नारायणी रागः

पुण्यजनपूजिते नारायणी जगदम्बिके

## सरस्वतीमनोहरि रागः

पूर्णफलप्रदचरणे सरस्वतीमनोहरे

## शुद्धवसन्त रागः

पुष्पितशुद्धवसन्ते पुण्डरीकसदृशकरे

## केदर रागः

केदारेशसहाये गुरुगुहवेदितहृदये

## बिलहरि रागः

भण्डप्राणबिलहरि भक्तजनानन्दकरि

## हंसध्वनि रागः

अहर्निशंप्रकाशमानहंसध्वनिविराजिते

## नागध्वनि रागः

अपर्णे कुण्डलिनि नागध्वनिसहिते
ध्वनिसहिते सहिते हिते ते

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠